# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा - शास्त्री (SEM-3) | प्रश्नपत्रम् – ७ | |
|---|---|---|
| विषयः - सर्वदर्शनम् | (CE-2.3.3 NEW) | गुणाः - ७० |
| दिनाङ्कः - ११/१२/२०१८ | ग्रन्थः मीमांसान्यायप्रकाशः -पूर्वार्धम् | समयः -०२.०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ कयोश्चिद् द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिखत । (१०)**

(१) मीमांसामतानुसारं भावनास्वरूपं प्रतिपादयत ।

(२) वेदलक्षणं प्रतिपाद्य वेदविभागं प्रदर्शयत ।

(३) विधिलक्षणं यथाग्रन्थं विचारयत ।

**प्रश्नः २ कस्यचिदेकस्य प्रश्नस्य निबन्धात्मकम् उत्तरं लिखत । (१०)**

(१) विशिष्टविधौ मत्वर्थलक्षणाविधानं प्रतिपादयत ।

(२) यथाग्रन्थम् आख्यातार्थस्य निरूपणं लिखत ।

**द्वितीयान्वितिः**

**प्रश्नः ३ कयोश्चिद् द्वयोः व्याख्यात्मकम् उत्तरं प्रदीयताम् । (१०)**

(१) लिङ्प्रमाणं यथाग्रन्थं निरूपयत ।

(२) वाक्यप्रमाणं सोदाहरणं विशदयत ।

(३) विधेः चातुर्विध्यत्वं प्रतिपादयत ।

**प्रश्नः ४ कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत । (१०)**

(१) श्रुतिप्रमाणस्य उदाहरणपुरःसरं विवेचनं कुरुत ।

(२) प्रकरणप्रमाणं यथाग्रन्थं विशदयत ।

**तृतीयान्वितिः**

**प्रश्नः ५ कयोश्चिद् द्वयोः व्याख्यात्मकम् उत्तरं लिखत । (१०)**

(१) श्रुतिप्राबल्यनिरूपणं कुरूत ।

(२) प्रकरणप्रमाणं सोदाहरणं विशदयत ।

(३) पाठक्रमं यथाग्रन्थं व्याख्यात ।

**प्रश्नः ६ कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत । (१०)**

(१) मीमांसादर्शनानुसारं वेदानाम् अपौरुषेयत्वं साधयत ।

(२) अधिकारविधिः सोदाहरणं प्रतिपाद्यताम् ।

## चतुर्थान्वितिः

**प्रश्नः ७ केषाञ्चन दशप्रश्नानाम् अतिलघूत्तरात्मकम् उत्तरं लिखत ।** **( १० )**

(१) को नाम विधिः ?

(२) लिङ्त्वांशेन का भावना उच्यते ?

(३) आख्याततत्वांशेन का भावना उच्यते ?

(४) मीमांसान्यायप्रकाशकारः कः ?

(५) ''सोमेन यजेत'' इत्यस्य कः अर्थः ?

(६) ''दध्ना जुहोति'' इत्यस्य कः अर्थः ?

(७) ''आख्यातवाच्यः कर्ता'' इति कस्य मतम् ?

(८) को नाम उत्पत्तिविधिः ?

(९) को नाम विनियोगविधिः ?

(१०) व्रीहिषु प्रोक्षणेन किम् उत्पद्यते ?

(११) ''पशुना यजेत'' इत्यत्र करणवाचिविभक्तिः का ?

(१२) किं नाम लिङ्गम् ?

(१३) प्रयाजादयः यागाः कति सन्ति ?

(१४) मीमांसादर्शने भाष्यं केन रचितम् ?

(१५) मीमांसादर्शनस्य प्रथमं सूत्रं किम् ?

----ooooo-----